कञ्चुलिकायां (कांचुली) स्वार्थे क । तत्रैवार्थे । “प्रस्वेदवारिसविशेषविषक्तमङ्गे कु(कू)र्पासकं क्षतनखक्षतमुत्क्षिपन्ती” माघः । “मनोज्ञकु(कू)र्पासकपीडितस्तना” रत्ना० [ २कर्त्तरि त्रि० । स्त्रियां ङीप् ।

**कुर्व्वत्** पुंस्त्री कृ—शतृ । १चर्म्मकारे २भृत्ये त्रि० भिक्षुः

**कुर्व्वद्रूप** पु० कुर्वत् फलोन्मुखं रूपं यस्य । बौद्धमतसिद्धे फलजननाय योग्ये धान्यादौ वीजे । स च बौद्धमते अतिशयात्मा सहकारिभिराधीयते इति स्थितम् यथा “अथ भावादभिन्नोऽतिशयः सहकारिभिराधीयते इत्यभ्युपगम्यते तर्हि प्राचीनभावोऽनतिशयात्मा निवृत्तः अन्यश्चातिशयात्मा कुर्व्वद्रूपादिपदवेदनीयो जायत इति” सर्व्वदर्शनसं० । क्षणिकशब्दे बौद्धशब्दे च विवृतिः ।

**कुर्व्वाण** त्रि० कृ—शानच् । १भृत्ये २कारके च शब्दचि० ।

**कुर्व्वादि** पु० अपत्ये ण्यप्रत्ययनिमित्ते पाणिन्युक्ते शब्दगणभेदे “स च गणः कुरु गर्गर मङ्गुष अजमार रथकार वावदूक (सम्राजः क्षत्रिये) कवि विमति कापिञ्जलादि वाक् वामरथ पितृमत् इन्द्रलाजी एजि वातकि दामोष्णीषि गणकारि कैशोरि कुट शलाका सुर पुर एरका शुभ्र अभ्र दर्भ केशिनी ( वेणा छन्दसि ) शूर्पणाय श्यावनाय श्यावरथ श्यावपुत्र सत्यङ्कार वड्भीकार पथिकार मूढ शकन्धु शङ्कु शाकम् शाकिन् शालीन कर्त्तृ हर्त्तृ इन पिण्डी ( वामरथस्य कण्वादिवत् स्वरवर्जम् ) कौरव्य

**कुल** बन्धे संहतौ च भ्वा०पर०अक० सेट् । कोलति अकोलीत् चकोल । कुलम् । वंशएवास्य प्रयोग इति वदन् दुर्गादासः आकुलः सङ्कुलइत्यादिप्रयोगमपश्यन् परास्तः । आ+व्यग्रतायाम् चञ्चलतायाम् । आकोलति “किमेतदित्याकुलमीक्षितं जनैः” माघः “उदपतद्दिवमाकुललोचनैः” भट्टिः ।

सम्+सङ्कीर्णतायाम् सङ्कुल युद्धम् भा०द्रो०प० । “अलिकुलसंकुलकुसुमनिराकुलेत्यादि” जयदेवः । “शङ्खकुलाकुलेन” माघः ।

**कुल** न० कुल—क, कुङ् शब्दे कर्म्मणि बा० लक्, कुं भूमिं लाति ला—क, कौ भूमौ लीयते “अन्येभ्योऽपि” पा०ड० यथायथम् व्युत्पत्तिः । १जनपदे देशे । मध्यमहलद्वयेन यावती भूमिः कृष्यते तावत्यां २भूमौ “दशी कुलन्तु भुञ्जीत” मनुः । “अष्टागवं धर्म्महलं षड्गवं जीवितार्थिनाम् । चतुर्गवं गृहस्थानां द्विगवं ब्रह्मघातिनाम्” हारीतस्मरणात् “षड्गवं मध्यमं हलमिति तथाविधहलद्वयेन यावती भूमिः कृष्यते तावद्भूमिः कुलमित्युच्यते कुल्लू० । ३गोत्रे ४वंशे । ५सजातिगणे विप्रकुलम् पक्षिकुलम् । खगकुलाय कुलायनिलायिताम् माघः तत्र सत्कुलधर्म्माश्च “आचारो विनयो विद्या प्रतिष्ठा-तीर्थदर्शनम् । निष्ठा वृत्तिस्तपोदानं नवधा कुललक्षणम्” । अभियुक्तोक्ताः तस्य नाशकधर्म्माश्च कूर्म्म पु०१५ अ० उक्ता यथा “गोभिश्च घोटकैर्विप्र ! कृष्या राजोपसेवया । कुलान्यकुलतां यान्ति यानि हीनानि वृत्ततः । कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च । कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण वै । अनृतात् पारदार्य्याच्च तथाऽभक्ष्यस्य भक्षणात् । अश्रौतधर्म्माचरणात् क्षिप्रं नश्यति वै कुलम् । अश्रोत्रियेषु वेदानां वृषलेषु तथैव च । विहिताचारहीनेषु क्षिप्रं नश्यति वै कुलम्” ।

मनुना तु कुलनाशवृद्ध्योः कारणमुक्तं यथा “शोचन्ति जामयो यत्र विनश्यत्याशु तत् कुलम् । न शोचन्ति तु यत्रैता वर्द्धते तद्धि सर्वदा । जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः । तानि कृत्याहतानीव विनश्यन्ति समन्ततः । तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः । भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च । सन्तुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च । यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् । यदि हि स्त्री न रोचेत पुमांसं न प्रमोदयेत् । अप्रमोदात् पुनः पुंसः प्रजनं न प्रवर्त्तते । स्त्रियान्तु रोचमानायां सर्वं तद्रोचते कुलम् । तस्यान्त्वरोचमानायां सर्व्वमेव न रोचते । कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च । कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च । शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः । गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया । अयाज्ययाजनैश्चैव नास्तिक्येन च कर्म्मणाम् । कुलान्याशु विनश्यन्ति यानि हीनानि मन्त्रतः । मन्त्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि । कुलसङ्ख्याञ्च गच्छन्ति कर्षन्ति च महद् यशः” ।

कुलरक्षार्थंविवाह विषये त्याज्यकुलानि मनुनोक्तानि यथा “महान्त्यपि समृद्धानि गोऽजाविधनधान्यतः । स्त्रीसम्बन्धे दशैतानि कुलानि परिवर्ज्जयेत् । हीनक्रियं निष्पुरुषं निश्छन्दोरोमशार्शसम् । क्षय्यामयाव्यपस्मारिश्वित्रि कुष्ठिकुलानि च” । ६गृहे ७देहे च ८श्रेष्ठे त्रि० मेदि० । “जीवप्रकृतितत्त्वञ्च दिक्कालाकाशमेव च । क्षित्यप्तेजो वायवश्च कुलमित्यभिधीयते” तन्त्रोक्तेषु ९जीवादिषु १०कु–